# Shri Raghavendra Prarthana

# શ્રીરાઘવેન્દ્રપ્રાર્થના

## Document Information

Text title : Raghavendra Prarthana

File name : rAghavendraprArthanA.itx

Category : raama, aShTaka

Location : doc_raama

Author : jagannAthadAsa

Latest update : December 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 23, 2021

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રપ્રાર્થના

અહીશાંશમીશં સમીરેણ યુક્તં
　સરોજાયતાક્ષં સુદાસૈકપૂજ્યમ્ ।
વદાન્યં સુમાન્યં વરેણ્યં શરણ્યં
　ગુરું રાઘવેન્દ્રં સદાઽહં નમામિ ॥ ૧॥

સદા મન્દહાસં સુપૂર્ણેન્દુવક્ત્રં
　લસચ્ચેલભૂષં સ્મરસ્યાતિદૂરમ્ ।
નમત્કામધેનું હરન્તં મનો મે
　અઘધ્વંસિનં રાઘવેન્દ્રં ભજામિ ॥ ૨॥

ભજત્કલ્પવૃક્ષં ભવાબ્ધ્યેકપોતં
　મહાનન્દતીર્થં કવીન્દ્રાબ્જમિત્રમ્ ।
ધરાદેવપાલં રમાનાથલોલં
　ત્યજત્કામજાલં ભજે રાઘવેન્દ્રમ્ ॥ ૩॥

ન યાચે ગજેન્દ્રં નરેન્દ્રાધિપત્યં
　ન યાચેઽમરત્વં ન લોકાધિપત્યમ્ ।
ન જાયાં ન પુત્રં ન શિષ્યાલિમન્નં
　ન ભાગ્યં ગુરો દેહિ તે પાદદાસ્યમ્ ॥ ૪॥

ઘનાનન્દસારં નવામ્ભોદનીલં
　મુરારાતિમિત્રં ત્રિલોકીશરણ્યમ્ ।
પરાભૂતશોકં સુરારાતિજાતં
　રમાનાથપોતં ભજે રાઘવેન્દ્રમ્ ॥ ૫॥

ધરાદેવદન્તાંશુજાતસ્રવન્તી-
　તટોલ્લાસિ રામાભિરામાઙ્ઘ્રિદાસમ્ ।
સુધામ્નાં લલામં કૃતોદ્ધામચર્યં
　પરિવ્રાડધીશં ભજે રાઘવેન્દ્રમ્ ॥ ૬॥

મહાનન્દતીર્થાબ્ધિમીનાયમાનમ્
    સુગેયં સુબોધં સુલીલાંશુજાલમ્ ।
મહાનન્દગાઢં સદા સદ્વિનોદં
    ગુરું રાઘવેન્દ્રં ભજે સાર્વભૌમમ્ ॥ ૭॥

ભજે રાઘવેન્દ્રં ભજે રાઘવેન્દ્રં
    ભજે રાઘવેન્દ્રં ભજે રાઘવેન્દ્રમ્ ।
નમસ્યામિ નિત્યં નમસ્યામિ નિત્યં
    નમસ્યામિ નિત્યં નમસ્યામિ નિત્યમ્ ॥ ૮॥

પ્રાર્થના રાઘવેન્દ્રસ્ય લોકક્ષેમાભિલાષિણા ।
સ્વામિના રચિતા સૈષા સર્વાભીષ્ટફ઼લપ્રદા ॥

ઇતિ શ્રીગુરુજગન્નાથદાસાર્યવિરચિત શ્રીરાઘવેન્દ્રપ્રાર્થના સમ્પૂર્ણ
    ॥ શ્રી કૃષ્ણાર્પણમસ્તુ ॥

*Shri Raghavendra Prarthana*

pdf was typeset on December 23, 2021

Please send corrections to *sanskrit@cheerful.com*